श्री पुष्पदंत रचित

# शिवमहिम्नस्तोत्र



# Shivmahimna Stotra

## - Pushpadant

## SHIVMAHIMNA STOTRA: AN INTRODUCTION

Lord Shiva is considered as one of the three main Deity [ त्रिदेव: The three forms of God – Brahma (creator), Vishnu (sustainer) and Mahesh or Shiva (destroyer) ] of Hindus. Aadi Shankaracharya has written quite a few stotras (songs of worship) on Lord Shiva. Many known and unknown scholars have also expressed their adoration for Lord Shiva with their own poetic verses. However among all stotras or stutis, the one written by Pushpadanta became very popular.

It would be interesting to know the circumstances which led Pushpadanta to compose this great song. Pushpadant was a Gandharva (गांधर्व - musician in the court of Indra). He had a particular liking for flowers. It so happened that he saw beautiful garden adorned with charming flowers. It was King Chitraratha's royal garden. King Chitraratha was a devotee of Lord Shiva. Every day, he used to offer flowers from his palatial garden as a symbol of his devotion to Lord Shiva.

Pushpadanta was fascinated by those stunning flowers, so he began to steal them. As a consequence, king Chitraratha was unable to pick flowers for offering to Lord Shiva. It was not an isolated incident. It became a routine affair. King Chitraratha made every effort to address the issue but remained unsuccessful. The reason was very simple; Pushpadanta had divine power to remain invisible.

At last, King spread Bilva leaves (बिलीपत्र), considered auspicious offering to Lord Shiva in his garden. Pushpadanta, unaware of this sudden change, stepped on Bilva leaves and incurred Lord Shiva's wrath. Shiva punished him for his misdeed and Pushpadanta lost his divine power of invisibility.

In order to seek absolution and please Lord Shiva, Pushpadant created a stotra (song of praise) in which he elaborated at length on Shiva's greatness. Shiva was pleased with this hymn, absolved him and returned his divine powers. The very stotra became known as the 'Shiva-mahimna Stotra'.

The recital of this stotra is very beneficial as proclaimed by one of its verses:

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत् ।
पठति परमभक्त्या शुद्धचित्तः पुमान्यः ॥
स बवति शिवलोके रुद्रतुल्यस्तथाडत्र ।
प्रचुरतर धनायुः पुत्रवान्कीर्तिमांश्च ॥३४॥

"Anyone who recites this hymn with a pure heart and devotion will be blessed with fame (कीर्ति), wealth (धन), long life (आयु) and many children (सुत) in this mortal world, and will attain Kailas, Shiva's abode, after death."

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥३६॥

"Benefit of singing Shivmahimna stotra is far greater than either the benefit of spiritual initiation (दीक्षा), charity (दान), austerity (तप), pilgrimage (तीर्थ), knowledge of the scriptures (ज्ञान), or the performance of ceremonial sacrifice (यज्ञ-याग)."

Shivmahimna Stotra has 43 verses. Find here the Sanskrit text of Pushpadanta's Shivmahimna stotra.

☼ ☼ ☼ ☼ ☼

# ॥ श्री शिवमहिम्नस्तोत्र॥

## ॥ श्री पुष्पदंत उवाच ॥

महिम्नः पारं ते परमविदुषो यज्ञसदृशी ।
स्तुतिर्ब्रह्मादीना मपि तदवसन्नास्त्वयि गिरः ॥
अथावाच्यः सर्वः स्वमतिपरिणामधि गृणन् ।
ममाप्येषः स्तोत्रे हर निरपवादः परिकरः ॥१॥

अतीतः पंथानं तव च महिमा वाड् मनसयो ।
रतद्व्यावृत्यायं चकितमभिधत्ते श्रुतिरपि ॥
स कस्य स्तोतव्यः कतिविधगुणः कस्य विषयः ।
पदे त्वर्वाचीने पतति न मनः कस्य न वचः ॥२॥

मधुस्फीता वाचः परमममृतं निर्मितवत ।
स्तव ब्रह्मन्किं वा गपि सुरगुरोर्विस्मयपदम् ॥
मम त्वेतां वाणीं गुणकथनपुण्येन भवतः ।
पुनामीत्यर्थेस्मिन् पुरमथनबुद्धिर्व्यवसिता ॥३॥

तवैश्वर्यं यत्तद् जगदुदयरक्षाप्रलयकृत ।
त्रयी वस्तु व्यस्तं तिसृषु गुणभिन्नासु तनुषु ॥
अभव्यानामस्मिन् वरद रमणीयामरमणीं ।
विहंतुं व्योक्रोशीं विदधत इहै के जडधियः ॥४॥

किमिहः किंकायः स खलु किमुपायस्त्रिभुवनं ।
किमाधारो धाता सृजति किमुपादान इति च ॥
अतकर्यैश्वर्येत्वय्यनवसरदुःस्थो हतधियः ।
कुतर्कोडयंकांश्चि न्मुखरयति मोहाय जगतः ॥५॥

अजन्मानो लोकाः किमवयवंवतोडपि जगता ।
मधिष्ठातारं किं भवविधिरनादत्य भवति ॥
अनीशो वा कुर्याद भुवनजनने कः परिकरो ।
यतो मंदास्त्वां प्रत्यमरवर संशेरत इमे ॥६॥

त्रयी सांख्यं योगः पशुपतिमतं वैष्णवमिति ।
प्रभिन्ने प्रस्थाने परमिदमदः पथ्यमिति च ॥
रुचीनां वैचित्र्या दजुकुटिलनानापथजुषां ।
नृणामेको गम्य स्त्वमसि पयमामर्णव इव ॥७॥

महोक्षः खड्वांगं परशुरजिनं भस्म फणिनः ।
कपालं चेतीय त्तव वरद तंत्रोपकरणम् ॥
सुरास्तां तामृद्धिं दधति तु भव द्भ्रूप्रणिहितां ।
नहि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥

ध्रुवं कश्चित्सर्वं सकलमपरस्त्वद्ध्रुवमिदं ।
परो ध्रौव्याध्रोव्ये जगति गदति व्यस्तविषये ॥
समस्तेडप्येतस्मि न्पुरमथन तैर्विस्मित इव ।
स्तुवंजिह्रेमि त्वां न खलु ननु धृष्टा मुखरता ॥९॥

तवैश्वर्यं यत्ना द्यदुपरि विरिंचिर्हरिरधः ।
परिच्छेतुं याता वनलमनलस्कंधवपुषः ॥
ततो भक्तिश्रद्धा भरगुरुगृणद्भ्यां गिरिश यत् ।
स्वयं तस्थे ताभ्यां तव किमनुवृत्तिने फलति ॥१०॥

अयत्नादापाद्य त्रिभुवनमवैरव्यतिकरं ।
दशास्यो यद्बाहू नभृन रणकंडुपरवशान् ॥
शिरःपद्मश्रेणी रचितचरणांभोरुहबलेः ।
स्थिरायास्त्वद्भक्ते स्त्रिपुरहर विस्फूर्जितमिदम् ॥११॥

अमुष्य त्वत्सेवा समधिगतसारं भुजवनं ।
बलात्कैलासेडपि त्वदधिवसतौ विक्रमयतः ॥
अलभ्यापाताले डप्यलसचलितांगुष्ठशिरसि ।
प्रतिष्ठा प्रत्वय्या सीद्ध्रुवमुपचितो मुह्यति खलः ॥१२॥

यदद्धिं सुत्राम्णो वरद परमोच्चैरपि सती ।
मधश्चक्रे बाणः परिजनविधेयस्त्रिभुवनः ॥
न तच्चित्रं तस्मिंन्वरिवसितरि त्वच्चरणयो ।
र्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः ॥१३॥

अकाण्ड ब्रह्माण्ड क्षयचकित देवासुरकृपा ।
विधेयस्यासीद्यस्त्रिनयविषं संहृतवतः ॥
स कल्माषः कण्ठे तव न कुरुते न श्रियमहो ।
विकारोऽपि श्लाध्यो भुवनभयभंगव्यसनिनः ॥१४॥

असिद्धार्था नैव कवचिदपि सदेवासुरनरे ।
निवर्तन्ते नित्यं जगति जयिनो यस्य विशिखाः ॥
स पश्यन्नीश त्वामितरसरुरसाधारणमभूत् ।
स्मरः स्मर्तव्यात्मा नहि वशिषु पथ्यः परिभवः ॥१५॥

मही पादाधाताद् व्रजति सहसा संशयपदं ।
पदं विष्णोर्भ्राम्यद्भुजपरिघरुग्णग्रहगणम् ॥
मुहुर्द्यौर्दौस्थ्यं यात्यनिभृतजटाताडिततटा ।
जगद्रक्षायै त्वं नटसि ननु वामैव विभुता ॥१६॥

वियद्व्यापी तारागणगुणितफेनोद्गमरुचिः ।
प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ॥
जगद् द्वीपाकारं जलधिवलयं तेन कृतमि ।
त्यनेनैवोन्नेयं धृतमहिम दिव्यं तव वपुः ॥१७॥

रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो ।
रथाडगे चन्द्रार्कौ रथचरणपाणिः शर इति ॥
दिधक्षोस्ते कोडयं त्रिपुरतृणमाडम्बरविधिर् ।
विधेयैः क्रीडन्त्यो न खलु परतन्त्राः प्रभुधियः ॥१८॥

हरिस्ते साहस्त्रं कमलबलिमाधाय पदयो ।
यदिकोने तस्मिन् निजमुदहरन्नेत्रकमलम् ॥
गतो भकत्युद्रेकः परिणतिमसौ चक्रवपुषा ।
त्रयाणां रक्षायै त्रिपुरहर जागर्ति जगताम् ॥१९॥

क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां ।
क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ॥
अतस्त्वां सम्प्रेक्ष्य क्रतुषु फलदानप्रतिभुवं ।
श्रुतौ श्रद्धां बद्ध्वा दटपरिकरः कर्मसु जनः ॥२०॥

क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृता ।
मृषीणामार्त्विज्यं शरणद सदस्याः सुरगणाः ॥
क्रतुभ्रंषस्त्वत्तः क्रतुफलविधानव्यसनिनो ।
ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥२१॥

प्रजानाथं नाथ प्रसभमभिकं स्वां दुहितरं ।
गतं रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषा ॥
धनुष्पाणेर्यातं दिवमपि सपत्राकृतंममुं ।
त्रसन्तं तेऽद्यापि त्यजति न मृगव्याधरभसः ॥२२॥

स्वलावण्याशंसाधृतधनुषमह्नाय तृणवत् ।
पुरः प्लुष्टं दृष्टवा पुरमथन पुष्पायुधमपि ॥
यदि स्त्रैणं देवी यमनिरत देहार्धघटना ।
दवैति त्वामद्धा बत वरद मुग्धा युवतयः ॥२३॥

स्मशानेष्वाक्रीडा स्मरहर पिशाचाः सहचरा ।
श्चिताभस्मालेपः स्तगपि नृकरोटीपरिकरः ॥
अमंगल्यं शीलं तव भवतु नामैवमखिलं ।
तथाऽपि स्मर्तृणां वरद परमं मंगलमसि ॥२४॥

मनः प्रत्यक्चित्ते सविधमवधायात्तमरुतः ।
प्रहृष्यद्रोमाणः प्रमदसलिलोत्संगितदशः ॥
यदालोक्याह्लादं ह्रद इव निमज्ज्यामृतमये ।
दद्यत्यंतस्तत्त्वं क्रिमपि यमिनस्तत्किल भवान् ॥२५॥

त्वमर्कस्त्वं सोमस्त्वमसि पवनस्त्वं हुतवह ।
स्त्वमापस्त्वं व्योम त्वमु धरणिरात्मा त्वमिति च ॥
परिच्छिन्नामेवं त्वयिपरिणता बिभ्रतु गिरं ।
न विद्मस्तत्तत्वं वयमिह तु यत्त्वं न भवसि ॥२६॥

त्रयीं तिस्त्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरा ।
नकाराद्यैर्वर्णै स्त्रिभिरभिदधत्तीर्ण विकृतिः ॥
तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः ।
समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम् ॥२७॥

भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहां ।
स्तथां भीमशानाविति यदभिधानाष्टकमिदम् ॥
अमुष्मिन्प्रत्येकं प्रवितरति देव श्रुतिरपि ।
प्रियायास्मै धाम्ने प्रणिहितनमस्योडस्मि भवते ॥२८॥

नमो नेदिष्ठाय प्रियदवदविष्ठाय च नमो ।
नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ॥
नमोवर्षिष्ठाय त्रिनयन यविष्ठा च नमः ।
नमः सर्वस्मै ते तदिदमितिशर्वाय च नमः ॥२९॥

बहलरजसे विश्वोत्पत्तौ भवाय नमो नमः ।
प्रबलतमसे तत्संहारे हराय नमो नमः ॥
जनसुखकृते सत्त्वोद्रिक्तौ मृडाय नमो नमः ।
प्रमहसि पदे निस्त्रैगुण्ये शिवाय नमो नमः ॥३०॥

कृशपरिणति चेतः क्लेशवश्यं क्व चेदं ।
क्व च तव गुणसीमोल्लंधिनी शश्वदृद्धिः ॥
इति चकितममन्दीकृत्य मां भक्तिराधाद् ।
वरद चरणयोस्ते वाक्यपुष्पोपहारम् ॥३१॥

असितगिरिसमंस्यात् कज्जलं सिंधुपात्रे ।
सुरतरुवरशाखा लेखिनी पत्रमुर्वि ॥
लिखति यदि गृहीत्वा शारदा सर्वकालं ।
तदपि तव गुणाना मीश पारं न याति ॥३२॥

असुरसुर मुनीन्द्रै रर्चितस्येन्दुमौले ।
ग्रथितगुणमहिम्नो निर्गुणस्येश्वरस्य ॥
सकलगणवरिष्ठः पुष्पदन्ताभिधानो ।
रुचिरमलधुवृत्तैः स्तोत्रमेतच्चकार ॥३३॥

अहरहरनवद्यं धूर्जटेः स्तोत्रमेतत् ।
पठति परमभक्त्या शुद्धचित्तः पुमान्यः ॥
स बवति शिवलोके रुद्रतुल्यस्तथाडत्र ।
प्रचुरतर धनायुः पुत्रवान्कीर्तिमांश्च ॥३४॥

महेशान्नापरो देवो महिम्नो नापरा स्तुतिः ।
अघोरान्नापरो मंत्रो नास्ति तत्त्वं गुरोः परम् ॥३५॥

दीक्षा दानं तपस्तीर्थं ज्ञानं यागादिकाः क्रियाः ।
महिम्नस्तवपाठस्य कलां नार्हन्ति षोडशीम् ॥३६॥

कुसुमदशननामा सर्वगन्धर्वराजः ।
शिशुशशिधरमौलेर्देव देवस्य दासः ॥
स खलु निजमहिम्नो भ्रष्ट एवास्य रोषात् ।
स्तवनमिदमकार्षीद् दिव्यदिव्यं महिम्नः ॥३७॥

सुरवरमुनिपूज्यं स्वर्गमोक्षैकहेतुं ।
पठति यदि मनुष्यः प्रांजलिर्नान्यचेताः ॥
व्रजति शिवसमीपं किन्नरैः स्तूयमानः ।
स्तवनमिदममोघं पुष्पदन्त प्रणीतम् ॥३८॥

आसमाप्तमिदं स्तोत्रं पुण्यं गंधर्वभाषितम् ।
अनौपम्यं मनोहारि शिवमीश्वर वर्णनम् ॥३९॥

इत्येषा वाडमयी पूजा श्रीमच्छंकरपादयोः ।
अर्पिता तेन देवेशः प्रीयतां मे सदाशिवः ॥४०॥

तव तत्त्वं न जानामि कीद्शोडसि महेश्वर ।
याद्सोडसि महादेव ताद्शाय नमो नमः ॥४१॥

एककालं द्विकालं वा त्रिकालं यः पठेन्नरः ।
सर्वपापविनिर्मुक्तः शिवलोके महीयते ॥४२॥

श्री पुष्पदंत मुखपंकज निर्गतेन ।
स्तोत्रेंण किल्बिहरेण हरप्रियेण ॥
कंठस्थितेन पठितेन समाहितेन ।
सुप्रीणितो भवति भूतपतिर्महेशः ॥४३॥

**॥ इति श्री पुष्पदंत विरचित शिवमहिम्न स्तोत्र संपूर्णम् ॥**

☼ ☼ ☼ ☼ ☼